श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

## श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये अरण्यकाण्डे

# ॥ षड्विंशः सर्गः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

## श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

# ॥ षड्विंशः सर्गः ॥

## श्रीरामेण दूषणसहितानां चतुर्दशसहस्रराक्षसानां वधः

दूषणस्तु स्वकं सैन्यं हन्यमानं विलोक्य च।
सन्दिदेश महाबाहुर्भीमवेगान् दुरासदान्॥ **3.26.1** ॥

राक्षसान् पञ्चसाहस्रान् समरेष्वनिवर्तिनः।
ते शूलैः पट्टिशैः खड्गैः शिलावर्षैर्द्रुमैरपि॥ **3.26.2** ॥

शरवर्षैरविच्छिन्नं ववर्षुस्तं समन्ततः।
तद् द्रुमाणां शिलानां च वर्षं प्राणहरं महत्॥ **3.26.3** ॥

प्रतिजग्राह धर्मात्मा राघवस्तीक्ष्णसायकैः।
प्रतिगृह्य च तद् वर्षं निमीलित इवर्षभः॥ **3.26.4** ॥

रामः क्रोधं परं लेभे वधार्थं सर्वरक्षसाम्।
ततः क्रोधसमाविष्टः प्रदीप्त इव तेजसा॥ **3.26.5** ॥

शरैरभ्यकिरत् सैन्यं सर्वतः सहदूषणम्।
ततः सेनापतिः क्रुद्धो दूषणः शत्रुदूषणः॥ **3.26.6** ॥

शरैरशनिकल्पैस्तं राघवं समवारयत्।
ततो रामः सुसङ्क्रुद्धः क्षुरेणास्य महद् धनुः॥ **3.26.7** ॥

चिच्छेद समरे वीरश्चतुर्भिश्चतुरो हयान्।
हत्वा चाश्वान् शरैस्तीक्ष्णैरर्धचन्द्रेण सारथेः ॥ **3.26.8** ॥

शिरो जहार तद्रक्षस्त्रिभिर्विव्याध वक्षसि।
स च्छिन्नधन्वा विरथो हताश्वो हतसारथिः ॥ **3.26.9** ॥

जग्राह गिरिशृङ्गाभं परिघं रोमहर्षणम्।
वेष्टितं काञ्चनैः पट्टैर्देवसैन्याभिमर्दनम् ॥ **3.26.10** ॥

आयसैः शङ्कुभिस्तीक्ष्णैः कीर्णं परवसोक्षितम्।
वज्राशनिसमस्पर्शं परगोपुरदारणम् ॥ **3.26.11** ॥

तं महोरगसङ्काशं प्रगृह्य परिघं रणे।
दूषणोऽभ्यपतद् रामं क्रूरकर्मा निशाचरः ॥ **3.26.12** ॥

तस्याभिपतमानस्य दूषणस्य च राघवः।
द्वाभ्यां शराभ्यां चिच्छेद सहस्ताभरणौ भुजौ ॥ **3.26.13** ॥

भ्रष्टस्तस्य महाकायः पपात रणमूर्धनि।
परिघश्छिन्नहस्तस्य शक्रध्वज इवाग्रतः ॥ **3.26.14** ॥

कराभ्यां च विकीर्णाभ्यां पपात भुवि दूषणः।
विषाणाभ्यां विशीर्णाभ्यां मनस्वीव महागजः ॥ **3.26.15** ॥

दृष्ट्वा तं पतितं भूमौ दूषणं निहतं रणे।
साधु साध्विति काकुत्स्थं सर्वभूतान्यपूजयन् ॥ **3.26.16** ॥

एतस्मिन्नन्तरे क्रुद्धास्त्रयः सेनाग्रयायिनः।
संहत्याभ्यद्रवन् रामं मृत्युपाशावपाशिताः ॥ **3.26.17** ॥

महाकपालः स्थूलाक्षः प्रमाथी च महाबलः।
महाकपालो विपुलं शूलमुद्यम्य राक्षसः ॥ **3.26.18** ॥

स्थूलाक्षः पट्टिशं गृह्य प्रमाथी च परश्वधम्।
दृष्ट्वैवापततस्तांस्तु राघवः सायकैः शितैः ॥ **3.26.19** ॥

तीक्ष्णाग्रैः प्रतिजग्राह सम्प्राप्तानतिथीनिव।
महाकपालस्य शिरश्चिच्छेद रघुनन्दनः ॥ **3.26.20** ॥

असङ्ख्येयैस्तु बाणौघैः प्रममाथ प्रमाथिनम्।
स्थूलाक्षस्याक्षिणी स्थूले पूरयामास सायकैः ॥ **3.26.21** ॥

स पपात हतो भूमौ विटपीव महाद्रुमः।
दूषणस्यानुगान् पञ्चसाहस्रान् कुपितः क्षणात् ॥ **3.26.22** ॥

हत्वा तु पञ्चसाहस्रैरनयद् यमसादनम्।
दूषणं निहतं श्रुत्वा तस्य चैव पदानुगान् ॥ **3.26.23** ॥

व्यादिदेश खरः क्रुद्धः सेनाध्यक्षान् महाबलान्।
अयं विनिहतः सङ्ख्ये दूषणः सपदानुगः ॥ **3.26.24** ॥

महत्या सेनया सार्धं युद्ध्वा रामं कुमानुषम्।
शस्त्रैर्नानाविधाकारैर्हनध्वं सर्वराक्षसाः ॥ **3.26.25** ॥

एवमुक्त्वा खरः क्रुद्धो राममेवाभिदुद्रुवे।
श्येनगामी पृथुग्रीवो यज्ञशत्रुर्विहङ्गमः ॥ **3.26.26** ॥

दुर्जयः करवीराक्षः परुषः कालकार्मुकः।
हेममाली महामाली सर्पास्यो रुधिराशनः ॥ **3.26.27** ॥

द्वादशैते महावीर्या बलाध्यक्षाः ससैनिकाः।
राममेवाभ्यधावन्त विसृजन्तः शरोत्तमान् ॥ **3.26.28** ॥

ततः पावकसङ्काशैर्हेमवज्रविभूषितैः।
जघान शेषं तेजस्वी तस्य सैन्यस्य सायकैः ॥ **3.26.29** ॥

ते रुक्मपुङ्खा विशिखाः सधूमा इवपावकाः।
निजघ्नुस्तानि रक्षांसि वज्रा इव महाद्रुमान्॥ **3.26.30**॥

रक्षसां तु शतं रामः शतेनैकेन कर्णिना।
सहस्रं तु सहस्रेण जघान रणमूर्धनि॥ **3.26.31**॥

तैर्भिन्नवर्माभरणाश्छिन्नभिन्नशरासनाः।
निपेतुः शोणितादिग्धा धरण्यां रजनीचराः॥ **3.26.32**॥

तैर्मुक्तकेशैः समरे पतितैः शोणितोक्षितैः।
विस्तीर्णा वसुधा कृत्स्ना महावेदिः कुशैरिव॥ **3.26.33**॥

तत्क्षणे तु महाघोरं वनं निहतराक्षसम्।
बभूव निरयप्रख्यं मांसशोणितकर्दमम्॥ **3.26.34**॥

चतुर्दशसहस्राणि रक्षसां भीमकर्मणाम्।
हतान्येकेन रामेण मानुषेण पदातिना॥ **3.26.35**॥

तस्य सैन्यस्य सर्वस्य खरः शेषो महारथः।
राक्षसस्त्रिशिराश्चैव रामश्च रिपुसूदनः॥ **3.26.36**॥

शेषा हता महावीर्या राक्षसा रणमूर्धनि।
घोरा दुर्विषहाः सर्वे लक्ष्मणस्याग्रजेन ते॥ **3.26.37**॥

ततस्तु तद्भीमबलं महाहवे
    समीक्ष्य रामेण हतं बलीयसा।
रथेन रामं महता खरस्ततः
    समाससादेन्द्र इवोद्यताशनिः॥ **3.26.38**॥

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये अरण्यकाण्डे षड्विंशः सर्गः॥